

॥ श्रीगुरुभ्यो नमः ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

## तृतीयकाण्डे प्रथमः प्रश्नः

### न्यूनकर्माभिधानं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

प्रजापतिरकामयत प्रजाः सृजेयेति स तपोऽतप्यत स सर्पानसृजत सोऽकामयत प्रजाः सृजेयेति स द्वितीयमतप्यत स वयाꣳस्यसृजत सोऽकामयत प्रजाः सृजेयेति स तृतीयमतप्यत स एतन्दीक्षितवादमपश्यत् तमवदत् ततो वै स प्रजा असृजत यत् तपस्तप्त्वा दीक्षितवादव्ँवदति प्रजा एव तद्यजमानः ॥ [१] ॥ सृजते यद्वै दीक्षितोऽमेद्ध्यम्पश्यत्यपास्माद् दीक्षा क्रामति नीलमस्य हरो व्येत्यबद्धम्मनो दरिद्रञ्चक्षुः सूर्यो ज्योतिषाꣳ श्रेष्ठो दीक्षे मा मा हासीरित्याह नास्माद्दीक्षाऽप क्रामति नास्य नीलन्न हरो व्येति यद्वै दीक्षितमभिवर्षति दिव्या आपोऽशान्ता ओजो बलन्दीक्षां ॥ [२] ॥ तपोऽस्य निर्घ्नन्त्युन्दतीर् बलन्धत्तौजो धत्त बलन्धत्त मा मे दीक्षाम्मा तपो निर्वधिष्टेत्याहै तदेव सर्वमात्मन् धत्ते नास्यौजो बलन्न दीक्षान्न तपो निर्घ्नन्त्यग्निर् वै दीक्षितस्य देवतासोऽस्मादेतर्हि तिर इव यर्हि याति तमीश्वरꣳ रक्षाꣳसि हन्तोर् ॥ [३] ॥ भद्रादभि श्रेयः प्रेहि बृहस्पतिः पुरेता ते अस्त्वित्याह ब्रह्म वै देवानाम्बृहस्पति स्तमेवान्वारभते स एनꣳ सम्पारयत्येदमगन्म देवयजनम्पृथिव्या इत्याह देवयजनꣳ ह्येष पृथिव्या आगच्छति यो यजते विश्वे देवा यदजुषन्त पूर्व इत्याह विश्वे ह्येतद्देवा जोषयन्ते यद्ब्राह्मणा ऋक्सामाभ्याय्ँयजुषा सन्तरन्त इत्याहर्क्सामाभ्याꣳ ह्येष यजुषा सन्तरति यो यजते रायस्पोषेण समिषामदेमेत्याहाऽशिषमेवै तामा शास्ते ॥ [४] ॥

(यजमानो दीक्षाꣳ हन्तोर् ब्राह्मणा श्चतुर्विꣳशतिश्च) ॥ १ ॥

एष ते गायत्रो भाग इति मे सोमाय ब्रूतादेष ते त्रैष्टुभो जागतो भाग इति मे सोमाय ब्रूता-
च्छन्दोमानाꣳ साम्राज्यङ्गच्छेति मे सोमाय ब्रूताद् यो वै सोमꣳ राजानꣳ साम्राज्यल्ँलोकङ्गम-
यित्वा क्रीणाति गच्छति स्वानाꣳ साम्राज्यञ्छन्दाꣳसि खलु वै सोमस्य राज्ञः साम्राज्यो लोकः
पुरस्ताथ् सोमस्य क्रयादेवमभि मन्त्रयेत साम्राज्यमेवै ॥ [५] ॥ नल्ँलोकङ्गमयित्वा क्रीणाति
गच्छति स्वानाꣳ साम्राज्यय्ँयो वै तानूनप्त्रस्य प्रतिष्ठाव्ँवेद प्रत्येव तिष्ठति ब्रह्मवादिनो वदन्ति न
प्राश्नन्ति न जुह्वत्यथ क्व तानूनप्त्रम्प्रति तिष्ठतीति प्रजापतौ मनसीति ब्रूयात् त्रिरव जिघ्रेत् प्रजा-
पतौ त्वा मनसि जुहोमीत्येषा वै तानूनप्त्रस्य प्रतिष्ठा य एवव्ँवेद प्रत्येव तिष्ठति यो ॥ [६] ॥ वा
अद्ध्वर्योः प्रतिष्ठाव्ँवेद प्रत्येव तिष्ठति यतो मन्येतानभिक्रम्य होष्यामीति तत् तिष्ठन्ना श्रावयेदेषा
वा अद्ध्वर्योः प्रतिष्ठा य एवव्ँवेद प्रत्येव तिष्ठति यदभिक्रम्य जुहुयात् प्रतिष्ठाया इयात् तस्माथ्
समानत्र तिष्ठता होतव्यम्प्रतिष्ठित्यै यो वा अद्ध्वर्योः स्वव्ँवेद स्ववानेव भवति स्रुग्वा अस्य
स्वव्ँवायव्यमस्य ॥ [७] ॥ स्वञ्चमसोऽस्य स्वय्ँयद्वायव्यव्ँवा चमसव्ँवाऽनन्वारभ्याऽऽश्रावयेथ्
स्वादियात् तस्मादन्वारभ्याऽऽश्राव्यꣳ स्वादेव नैति यो वै सोममप्रतिष्ठाप्य स्तोत्रमुपाकरो-
त्यप्रतिष्ठितः सोमो भवत्यप्रतिष्ठितः स्तोमोऽप्रतिष्ठितान्युक्थान्यप्रतिष्ठितो यजमानोऽप्रतिष्ठितो
ऽद्ध्वर्युर् वायव्यव्ँवै सोमस्य प्रतिष्ठा चमसोऽस्य प्रतिष्ठा सोमः स्तोमस्य स्तोम उक्थानाङ्ग्रहव्ँवा
गृहीत्वा चमसव्ँवोन्नीय स्तोत्रमुपाकुर्यात् प्रत्येव सोमꣳ स्थापयति प्रति स्तोमम्प्रत्युक्थानि प्रति
यजमानस्तिष्ठति प्रत्यद्ध्वर्युः ॥ [८] ॥

(एव तिष्ठति यो वायव्यमस्य ग्रहव्ँवै कान्नविꣳशतिश्च) ॥ २ ॥

यज्ञव्ँवा एतथ् सम्भरन्ति यथ् सोमक्रयण्यै पदय्ँयज्ञमुखꣳ हविर्द्धाने यर्हि हविर्द्धाने प्राची
प्रवर्तयेयुस्तर्हि तेनाक्षमुपाञ्ज्याद्यज्ञमुख एव यज्ञमनु सन्तनोति प्राञ्चमग्निम्प्र हरन्त्युत् पत्नीमा
नयन्त्यन्वनाꣳसि प्र वर्तयन्त्यथ वा अस्यैष धिष्णियो हीयते सोऽनु ध्यायति स ईश्वरो रुद्रो
भूत्वा ॥ [९] ॥ प्रजाम्पशून् यजमानस्य शमयितोर् यर्हि पशुमाप्रीतमुदञ्चन्नयन्ति तर्हि

तस्य पशुश्रपणꣳ हरेत् तेनैवैनम्भागिनङ्करोति यजमानो वा आहवनीयो यजमानव्ँवा एतद्वि कर्षन्ते यदाहवनीयात् पशुश्रपणꣳ हरन्ति स वैव स्यान्निर्मन्थ्यव्ँवा कुर्याद्यजमानस्य सात्मत्वाय यदि पशोरवदानन्नश्येदाज्यस्य प्रत्याख्यायमव द्येथ् सैव ततः प्रायश्चित्तिर्ये पशुव्ँविमथ्नीरन्यस्तान् कामयेतार्ऽऽ*तिमार्च्छेयुरिति कुविदङ्गेति नमोवृक्तिवत्यर्चाऽऽग्नीद्ध्रे जुहुयान्नमोवृक्तिमेवैषाव्ँवृङ्क्ते ताजगार्तिमार्च्छन्ति ॥ [१०] ॥

(भूत्वा ततः षड्विꣳशतिश्च) ॥ ३ ॥

प्रजापतेर् जायमानाः प्रजा जाताश्च या इमाः। तस्मै प्रति प्र वेदय चिकित्वाꣳ अनु मन्यताम्॥ इमम्पशुम्पशुपते ते अद्य बद्ध्नाम्यग्ने सुकृतस्य मद्ध्ये। अनु मन्यस्व सुयजा यजाम जुष्टन्देवानामिदमस्तु हव्यम्॥ प्रजानन्तः प्रति गृह्णन्ति पूर्वे प्राणमङ्गेभ्यः पर्याचरन्तम्। सुवर्गय्ँयाहि पथिभिर् देवयानैरोषधीषु प्रति तिष्ठा शरीरैः॥ येषामीशे ॥ [११] ॥ पशुपतिः पशूनाञ्चतुष्पदामुत च द्विपदाम्। निष्क्रीतोऽयय्ँयज्ञियम्भागमेतु रायस्पोषा यजमानस्य सन्तु॥ ये बद्ध्यमानमनु बद्ध्यमाना अभ्यैक्षन्त मनसा चक्षुषा च। अग्निस्ताꣳ अग्रे प्र मुमोक्तु देवः प्रजापतिः प्रजया सव्ँविदानः॥ य आरण्याः पशवो विश्वरूपा विरूपाः सन्तो बहुधैकरूपाः। वायुस्ताꣳ अग्रे प्र मुमोक्तु देवः प्रजापतिः प्रजया सव्ँविदानः॥ प्रमुञ्चमाना ॥ [१२] ॥ भुवनस्य रेतो गातुन्धत्त यजमानाय देवाः। उपाकृतꣳ शशमानय्ँयदस्थाज्जीवन्देवानामप्येतु पाथः॥ नाना प्राणो यजमानस्य पशुना यज्ञो देवेभिः सह देवयानः। जीवन्देवानामप्येतु पाथः सत्याः सन्तु यजमानस्य कामाः॥ यत् पशुर् मायुमकृतोरो वा पद्भिराहते। अग्निर् मा तस्मादेनसो विश्वान् मुञ्चत्वꣳहसः॥ शमितार उपेतन यज्ञं ॥ [१३] ॥ देवेभिरिन्वितम्। पाशात् पशुम्प्र मुञ्चत बन्धाद् यज्ञपतिम्परि॥ अदितिः पाशम्प्र मुमोक्त्वेतन्नमः पशुभ्यः पशुपतये करोमि॥ अरातीयन्तमधरङ्कृणोमि यन्द्विष्मस्तस्मिन् प्रति मुञ्चामि पाशम्॥ त्वामु ते दधिरे हव्यवाहꣳ शृतंकर्तारमुत यज्ञियञ्च। अग्ने सदक्षः सतनुर्हि भूत्वाऽथ हव्या जातवेदो जुषस्व॥ जातवेदो वपया गच्छ देवान् त्वꣳ हि होता प्रथमो बभूथ। घृतेन त्वन्तनुवो वर्द्धयस्व स्वाहाकृतꣳ हविरदन्तु देवाः॥ स्वाहा देवेभ्यो देवेभ्यः स्वाहा ॥ [१४] ॥

(ईशोप्रमुञ्चमानायज्ञं त्वꣳ षोडश च) ॥ ४ ॥

प्राजापत्या वै पशवस्तेषाꣳ रुद्रोऽधिपतिर्यदेताभ्यामुपाकरोति ताभ्यामेवैनं प्रतिप्रोच्याऽऽलभत आत्मनोऽनाव्रस्काय द्वाभ्यामुपाकरोति द्विपाद् यजमानः प्रतिष्ठित्या उपाकृत्य पञ्च जुहोति पाङ्क्ताः पशवः पशूनेवाव रुन्धे मृत्यवे वा एष नीयते यत् पशुस्तय्यँदन्वारभेत प्रमायुको यजमानः स्यान्नाना प्राणो यजमानस्य पशुनेत्याह व्यावृत्त्यै ॥ [१५] ॥ यत् पशुर् मायुमकृतेति जुहोति शान्त्यै शमितार उपेतनेत्याह यथायजुरेवैतद्वपायाँ्वा आह्रियमाणाया-मग्नेर्मेधोऽप क्रामति त्वामु ते दधिरे हव्यवाहमिति वपामभि जुहोत्यग्नेरेव मेधमव रुन्धेऽथो श्रतत्वाय पुरस्तात्स्वाहाकृतयो वा अन्ये देवा उपरिष्टाथ् स्वाहाकृतयो ऽन्ये स्वाहा देवेभ्यो देवेभ्यः स्वाहेत्यभितो वपाञ्जुहोति तानेवोभयान् प्रीणाति ॥ [१६] ॥

(व्यावृत्त्या अभितो वपां पञ्च च) ॥ ५ ॥

यो वा अयथादेवतय्यँज्ञमुपचरत्या देवताभ्यो वृश्च्यते पापीयान् भवति यो यथादेवतन्न देवताभ्य आ वृश्च्यते वसीयान् भवत्याग्नेय्यर्चाऽऽग्नीद्ध्रमभि मृशेद् वैष्णव्या हविर्द्धानमाग्नेय्या स्रुचो वायव्यया वायव्यान्यैन्द्रिया सदो यथादेवतमेव यज्ञमुप चरति न देवताभ्य आ वृश्च्यते वसीयान् भवति युनज्मि ते पृथिवीञ्ज्योतिषा सह युनज्मि वायुमन्तरिक्षेण ॥ [१७] ॥ ते सह युनज्मि वाचꣳ सह सूर्येण ते युनज्मि तिस्रो विपृचः सूर्यस्य ते। अग्निर् देवता गायत्री छन्द उपाꣳशोः पात्रमसि सोमो देवता त्रिष्टुप् छन्दोऽन्तर्यामस्य पात्रमसीन्द्रो देवता जगती छन्द इन्द्रवायुवोः पात्रमसि बृहस्पतिर् देवताऽनुष्टुप् छन्दो मित्रावरुणयोः पात्रमस्यश्विनौ देवता पङ्क्तिश्छन्दोऽश्विनोः पात्रमसि सूर्यो देवता बृहती ॥ [१८] ॥ छन्दः शुक्रस्य पात्रमसि चन्द्रमा देवता सतोबृहती छन्दो मन्थिनः पात्रमसि विश्वे देवा देवतोष्णिहा छन्द आग्रयणस्य पात्रमसीन्द्रो देवता ककुच्छन्द उक्थानाम्पात्रमसि पृथिवी देवता विराट् छन्दो ध्रुवस्य पात्रमसि ॥ [१९] ॥

(अन्तरिक्षेण बृहती त्रयस्त्रिꣳशाच्च) ॥ ६ ॥

इष्टर्गो वा अध्वर्युर् यजमानस्येष्टर्गः खलु वै पूर्वोऽर्ष्टुः क्षीयत आसन्यान्मा मन्त्रात् पाहि
कस्याश्चिदभिशस्त्या इति पुरा प्रातरनुवाकाज्जुहुयादात्मन एव तदध्वर्युः पुरस्ताच्छर्म नह्य-
तेऽनार्त्यै सँवेशाय त्वोपवेशाय त्वा गायत्रिया स्त्रिष्टुभो जगत्या अभिभूत्यै स्वाहा प्राणापानौ
मृत्योर् मा पातम्प्राणापानौ मा मा हासिष्टन्देवतासु वा एते प्राणापानयोर् ॥ [२०] ॥ व्याय-
च्छन्ते येषाꣳ सोमः समृच्छते सँवेशाय त्वोपवेशाय त्वेत्याह छन्दाꣳसि वै सँवेश उपवेशश्छ-
न्दोभिरेवास्य छन्दाꣳसि वृङ्क्ते प्रेतिवन्त्याज्यानि भवन्त्यभिजित्यै मरुत्वतीः प्रतिपदो विजित्या
उभे बृहद्रथन्तरे भवत इयँवाव रथन्तरमसौ बृहदाभ्यामेवैनमन्तरेत्यद्य वाव रथन्तरꣳ श्वो बृह-
दद्याश्वा देवैनमन्तरेति भूत ॥ [२१] ॥ वाव रथन्तरम्भविष्यद्बृहद् भूताच्चैवैनम्भविष्यतश्चा-
न्तरेति परिमितँवाव रथन्तरमपरिमितम्बृहत् परिमिताच्चैवैनमपरिमिताच्चाऽन्तरेति विश्वामि-
त्रजमदग्नी वसिष्ठेनास्पर्धेताꣳ स एतज्जमदग्निर् विहव्यमपश्यत् तेन वै स वसिष्ठस्येन्द्रियँवीर्य-
मवृङ्क्त यद्विहव्यꣳ शस्यत इन्द्रियमेव तद्वीर्यँयजमानो भ्रातृव्यस्य वृङ्क्ते यस्य भूयाꣳसो यज्ञक्रतव
इत्याहुः स देवता वृङ्क्त इति यद्यग्निष्टोमः सोमः परस्ताथ् स्यादुक्थ्यङ्कुर्वीत यद्युक्थ्यः स्यादति-
रात्रङ्कुर्वीत यज्ञक्रतुभिरेवास्य देवता वृङ्क्ते वसीयान्भवति ॥ [२२] ॥

(प्राणापानयोर् भूतं वृङ्क्ते ऽष्टाविꣳशतिश्च) ॥ ७ ॥

निग्राभ्याः स्थ देवश्रुत आयुर् मे तर्पयत प्राणम्मे तर्पयतापानम्मे तर्पयत व्यानम्मे तर्पयत
चक्षुर् मे तर्पयत श्रोत्रम्मे तर्पयत मनो मे तर्पयत वाचम्मे तर्पयताऽऽ*त्मानम्मे तर्पयताङ्गानि
मे तर्पयत प्रजाम्मे तर्पयत पशून् मे तर्पयत गृहान् मे तर्पयत गणान् मे तर्पयत सर्वगणम्मा
तर्पयत तर्पयत मा ॥ [२३] ॥ गणा मे मा वि तृषन्नोषधयो वै सोमस्य विशो विशः खलु वै
राज्ञः प्रदातोरीश्वरा ऐन्द्रः सोमोऽवीवृधँवो मनसा सुजाता ऋतप्रजाता भग इद्वः स्याम। इन्द्रेण
देवीर्वीरुधः सँविदाना अनु मन्यन्ताꣳ सवनाय सोममित्याहौषधीभ्य एवैनꣳ स्वायै विशः स्वायै

देवतायै निर्याच्याभि षुणोति यो वै सोमस्याभिषूयमाणस्य ॥ [२४] ॥ प्रथमोऽꣳशुः स्कन्दति स ईश्वर इन्द्रियव्ँवीर्यम्प्रजाम्पशून् यजमानस्य निर्हन्तोस्तमभि मन्त्रयेताऽऽमाऽस्कान्थ् सह प्रजया सह रायस्पोषेणेन्द्रियम्मे वीर्यम्मा निर्वधीरित्याशिषमेवैतामा शास्त इन्द्रियस्य वीर्यस्य प्रजायै पशूनामनिर्घाताय द्रप्सश्चस्कन्द पृथिवीमनु द्यामिमञ्च योनिमनु यश्च पूर्वः। तृतीयय्ँयोनिमनु सञ्चरन्तन्द्रप्सञ्जुहोम्यनु सप्त होत्राः ॥ [२५] ॥

(तर्पयत मा ऽभिषूयमाणस्य यश्च दश च) ॥ ८ ॥

यो वै देवान् देवयशसेनार्पयति मनुष्यान् मनुष्ययशसेन देवयशस्येव देवेषु भवति मनुष्ययशसी मनुष्येषु यान् प्राचीनमाग्रयणाद् ग्रहान् गृह्णीयात् तानुपाꣳशु गृह्णीयाद् यानूर्ध्वाꣳस्तानुपब्दिमतो देवानेव तद्देवयशसनार्पयति मनुष्यान् मनुष्ययशसेन देवयशस्येव देवेषु भवति मनुष्ययशसी मनुष्येष्वग्निः प्रातस्सवने पात्वस्मान्वैश्वानरो महिना विश्वशंभूः। स नः पावको द्रविणन्दधात्वा ॥ [२६] ॥ युष्मन्तः सहभक्षाः स्याम॥ विश्वे देवा मरुत इन्द्रो अस्मानस्मिन् द्वितीये सवने न जह्युः। आयुष्मन्तः प्रियमेषाव्ँवदन्तो वयन्देवानाꣳ सुमतौ स्याम॥ इदन्तृतीयꣳ सवनङ्कवीनामृतेन ये चमसमैरयन्त। ते सौधन्वनाः सुवरानशानाः स्विष्टिन्नो अभि वसीयो नयन्तु॥ आयतनवतीर् वा अन्या आहुतयो हूयन्तेऽनायतना अन्या या आघारवतीस्ता आयतनवतीर्याः ॥ [२७] ॥ सौम्यास्ता अनायतना ऐन्द्रवायवमादायाऽऽ*घारमा घारयेदध्वरो यज्ञोऽयमस्तु देवा ओषधीभ्यः पशवे नो जनाय विश्वस्मै भूतायाऽध्वरोऽसि स पिन्वस्व घृतवद्देव सोमेति सौम्या एव तदाहुतीरायतनवतीः करोत्यायतनवान्भवति य एवव्ँवेदाथो द्यावापृथिवी एव घृतेन व्युनत्ति ते व्युत्ते उपजीवनीये भवत उपजीवनीयो भवति ॥ [२८] ॥ य एवव्ँवेदैष ते रुद्र भागो यन्निरयाचथास्तञ्जुषस्व विदेर् गौपत्यꣳ रायस्पोषꣳ सुवीर्यꣳ सव्ँवथ्सरीणाꣳ स्वस्तिम्॥ मनुः पुत्रेभ्यो दायव्ँव्यभजथ् स नाभानेदिष्ठम्ब्रह्मचर्यव्ँवसन्तन्निरभजथ् स आऽगच्छथ् सोऽब्रवीत् कथा मा निरभागिति न त्वा निरभाक्षमित्यब्रवीदङ्गिरस इमे सत्रमासते ते ॥ [२९] ॥ सुवर्गल्ँलोकन्न प्र जानन्ति तेभ्य इदम्ब्राह्मणम्ब्रूहि ते सुवर्गल्ँलोकय्ँयन्तो य एषां पशवस्ताꣳस्ते दास्यन्तीति तदेभ्योऽब्रवीत् ते सुवर्गल्ँलोकय्ँयन्तो य एषाम्पशव आसन् तानस्मा

अददुस्तम्पशुभिश्चरन्तँय्यज्ञवास्तौ रुद्र आऽगच्छथ् सोऽब्रवीन्मम वा इमे पशव इत्यदुर् वै ॥ [३०] ॥ मह्यमिमानित्यब्रवीन्न वै तस्य त ईशत इत्यब्रवीद्यद्यज्ञवास्तौ हीयते मम वै तदिति तस्माद्यज्ञवास्तु नाभ्यवेत्यꣳ सोऽब्रवीद्यज्ञे माऽऽभजाथ ते पशून् नाऽभि मꣳस्य इति तस्मा एतम्मन्थिनः सꣳस्रावमजुहोत् ततो वै तस्य रुद्रः पशून् नाभ्यमन्यत यत्रैत मेवव्ँविद्वान् मन्थिनः सꣳस्रावञ्जुहोति न तत्र रुद्रः पशूनभि मन्यते ॥ [३१] ॥

(दधात्वा यतनवतीर्या उपजीवनीयो भवति तेऽ दुर्वै यत्रैत मेकादश च) ॥ ९ ॥

⋆

जुष्टो वाचो भूयासञ्जुष्टो वाचस्पतये देवि वाक्। यद्वाचो मधुमत् तस्मिन् मा धाः स्वाहा सरस्वत्यै॥ ऋचा स्तोमꣳ समर्द्धय गायत्रेण रथंतरम्। बृहद्गायत्रवर्तनि॥ यस्ते द्रप्सः स्कन्दति यस्ते अꣳशुर् बाहुच्युतो धिषणयोरुपस्थात्। अद्ध्वर्योर् वा परि यस्ते पवित्राथ् स्वाहाकृतमिन्द्राय तञ्जुहोमि॥ यो द्रप्सो अꣳशुः पतितः पृथिव्याम्परिवापात् ॥ [३२] ॥ पुरोडाशात् करंभात्। धानासोमान्मन्थिन इन्द्र शुक्राथ् स्वाहाकृतमिन्द्राय तञ्जुहोमि॥ यस्ते द्रप्सो मधुमाꣳ इन्द्रियावान्थ् स्वाहाकृतः पुनरप्येति देवान्। दिवः पृथिव्याः पर्यन्तरिख्षाथ् स्वाहा कृतमिन्द्राय तञ्जुहोमि॥ अद्ध्वर्युर् वा ऋत्विजाम्प्रथमो युज्यते तेन स्तोमो योक्तव्य इत्याहुर् वागग्रेगा अग्र एत्वृजुगा देवेभ्यो यशो मयि दधती प्राणान् पशुषु प्रजाम्मयि ॥ [३३] ॥ च यजमाने चेत्याह वाचमेव तद्यज्ञमुखे युनक्ति वास्तु वा एतद्यज्ञस्य क्रियते यद्ग्रहान् गृहीत्वा बहिष्पवमानꣳ सर्पन्ति पराञ्चो हि यन्ति पराचीभिः स्तुवते वैष्णव्यर्चा पुनरेत्योप तिष्ठते यज्ञो वै विष्णुर् यज्ञमेवाकर् विष्णो त्वन्नो अन्तमः शर्म यच्छ सहन्त्य। प्र ते धारा मधुश्चुत उथ्सन्दुह्रते अख्षितमित्याह यदेवास्य शयानस्योपशुष्यति तदेवास्यैतेनाऽऽ*प्याययति ॥ [३४] ॥

(परिवापात् प्रजाम्मयि दुह्रते चतुर्दश च) ॥ १० ॥

⋆

अग्निना रयिमश्नवत् पोषमेव दिवेदिवे। यशसव्ँवीरवत्तमम्॥ गोमाꣳ अग्नेऽविमाꣳ अश्वी यज्ञो नृवथ्सखा सदमिदप्रमृष्यः। इडावाꣳ एषो असुर प्रजावान् दीर्घो रयिः पृथुबुध्नः सभावान्॥

आ प्यायस्व>१, सन्ते >२। इह त्वष्टारमग्रियँव्विश्वरूपमुप ह्वये। अस्माकमस्तु केवलः॥ तन्न-स्तुरीपमध पोषयित्नु देव त्वष्टर् वि रराणः स्यस्व। यतो वीरः ॥ [३५] ॥ कर्मण्यः सुदक्षो युक्तग्रावा जायते देवकामः॥ शिवस्त्वष्टरिहाऽऽ* गहि विभुः पोष उत त्मना। यज्ञेयज्ञे न उदव॥ पिशङ्गरूपः सुभरो वयोधाः श्रुष्टी वीरो जायते देवकामः॥ प्रजान्त्वष्टा वि ष्यतु नाभि-मस्मे अथा देवानामप्येतु पाथः॥ प्र णो दे>३, व्या नो दिवः >४॥ पीपिवांꣳसꣳ सरस्वतः स्तनय्ँयो विश्वदर्शतः। धुक्षीमहि प्रजामिषम् ॥ [३६] ॥ ये ते सरस्व ऊर्मयो मधुमन्तो घृतश्चुतः। तेषान्ते सुम्नमीमहे॥ यस्य व्रतम्पशवो यन्ति सर्वे यस्य व्रतमुपतिष्ठन्त आपः। यस्य व्रते पुष्टिपतिर् निविष्टस्तꣳ सरस्वन्तमवसे हुवेम॥ दिव्यꣳ सुपर्णँव्वयसम्बृहन्तमपाङ्गर्भँव्वृष-भमोषधीनाम्। अभीपतो वृष्ट्या तर्पयन्तन्तꣳ सरस्वन्तमवसे हुवेम॥ सिनीवालि पृथुष्टुके या देवानामसि स्वसा। जुषस्व हव्य ॥ [३७] ॥ माहुतम्प्रजान्देवि दिदिड्ढि नः॥ या सुपाणिः स्वङ्गुरिः सुषूमा बहुसूवरी। तस्यै विश्पत्नियै हविः सिनीवाल्यै जुहोतन॥ इन्द्रँव्वो विश्वत-स्परी>५, न्द्रन्नरः>६॥ असितवर्णा हरयः सुपर्णा मिहो वसाना दिवमुत् पतन्ति॥ त आऽव-वृत्रन्थ् सदनानि कृत्वाऽऽदित् पृथिवी घृतैर्व्युद्यते॥ हिरण्यकेशो रजसो विसारेऽहिर् धुनिर् वात इव ध्रजीमान्। शुचिभ्राजा उषसो ॥ [३८] ॥ नवेदा यशस्वतीरपस्युवो न सत्याः॥ आ ते सुपर्णा अमिनन्त एवैः कृष्णो नोनाव वृषभो यदीदम्। शिवाभिर् न स्मयमानाभिराऽगात् पतन्ति मिहः स्तनयन्त्यभ्रा॥ वाश्रेव विद्युन्मिमाति वथ्सन्न माता सिषक्ति। यदेषाँव्वृष्टिरसर्जि॥ पर्वत-श्चिन्महि वृद्धो बिभाय दिवश्चिथ् सानु रेजत स्वने वः। यत् क्रीडथ मरुत ॥ [३९] ॥ ऋष्टिमन्त आप इव सध्रियञ्चो धवध्वे॥ अभि क्रन्द स्तनय गर्भमा धा उदन्वता परि दीया रथेन। दृतिꣳ सु कर्ष विषितन्न्यञ्चꣳ समा भवन्तूद्वता निपादाः॥ त्वन्त्या चिदच्युताऽग्ने पशुर् न यवसे। धामा ह यत् ते अजर वना वृश्चन्ति शिक्वसः॥ अग्ने भूरीणि तव जातवेदो देव स्वधावोऽमृतस्य धाम। याश्च ॥ [४०] ॥ माया मायिनाँव्विश्वमिन्व त्वे पूर्वीः सन्दधुः पृष्टबन्धो॥ दिवो नो वृष्टि-म्मरुतो ररीध्वम्प्र पिन्वत वृष्णो अश्वस्य धाराः। अर्वाङेतेन स्तनयित्नुनेह्यपो निषिञ्चन्नसुरः पिता नः॥ पिन्वन्त्यपो मरुतः सुदानवः पयो घृतवद्विदथेष्वाभुवः। अत्यन्न मिहे वि नयन्ति वाजिनमुथ्सन्दुहन्ति स्तनयन्तमक्षितम्॥ उदप्रुतो मरुतस्ताꣳ इयर्त वृष्टि ॥ [४१] ॥ य्ँये

विश्वे मरुतो जुनन्ति। क्रोशाति गर्दा कन्येव तुन्ना पेरुन्तुञ्जाना पत्येव जाया॥ घृतेन द्यावापृ-
थिवी मधुना समुख्षत पयस्वतीः कृणुताऽऽ*प ओषधीः। ऊर्जञ्च तत्र सुमतिञ्च पिन्वथ यत्रा
नरो मरुतः सिञ्चथा मधु॥ उदुत्यं >७, चित्रं >८॥ और्वभृगुवच्छुचिमप्नवानवदा हुवे। अग्निꣳ
समुद्रवाससम्॥ आ सवꣳ सवितुर् यथा भगस्ये व भुजिꣳ हुवे। अग्निꣳ समुद्रवाससम्॥ हुवे
वातस्वनङ्कविम्पर्जन्यक्रन्द्यꣳ सहः। अग्निꣳ समुद्रवाससम् ॥ [४२] ॥

(वीर इषꣳ हव्य मुषसो मरुत श्च वृष्टिं भगस्य द्वादश च) ॥ ११ ॥

## समाप्ति कोर्वैः

(प्रजापतिरकामयतै ष ते गायत्रो यज्ञव्वै प्रजापतेर् जायमानाः प्राजापत्या यो वा अयथादेवत मिष्टगो निग्राभ्याः स्थ यो वै देवा ञ्जुष्टो ऽग्निना रयि मेकादश)

(प्रजापतिरकामयत प्रजापतेर्जायमाना व्यायच्छन्ते मह्यमिमा न्माया मायिनान् द्विचत्वारिꣳशत्)

(प्रजापतिरकामयता ऽग्निꣳ समुद्रवाससं)

॥ हरिः ॐ ॥

तृतीयकाण्डे प्रथमः प्रश्नः समाप्तः

| अनुवाकाः | पञ्चशत्यः |
|---|---|
| ११ | ४२ |

ॐ